**अह** अव्य० अहि–घञ् पृ०नलोपः । १प्रशंसायां, २ क्षेपे, ३वियोगे, ४नियहे, ५आचारातिशये, ६अर्च्चने च । "अथाह तदिन्द्रोऽसुच्यत देवो हि सः" "इदमहेदं सत्व क्षपयस्वत्याज्यमथायम्" शत०ब्रा० ।

**अहंयु** त्रि० अहमहङ्कारोऽस्त्यस्य युस् । १गर्व्वयुक्ते २अभिमानिनि "अहंयुनाथ क्षितिपः शुभंयुः" भट्टिः ।

**अहंश्रेयस्** त्रि० अहमित्यव्ययम् अहमेव श्रेयान् यत्र । अहंश्रेयानितिनिर्णयप्रयोजने । "अथ ह प्राणा अहंश्रेयसि व्यूदिरेऽहंश्रेयानहंश्रेयानस्मीति" छा०उ० "अथ ह प्राणाः एवं यथोक्तगुणाः सन्तोऽहंश्रेयान् अहंश्रेयान् अहं श्रेयानस्मीति एतस्मिन् प्रयोजने व्यूदिरे नाना विरुद्धं वा ऊदिरे उक्तवन्तः" भा० । "ते हेमे प्राणा अहंश्रेयसे विवदमाना ब्रह्म जग्मुः" छ०उ० । "ते इमे प्राणा वागादयोऽहंश्रेयसे अहंश्रेयानित्येतस्मै प्रयोजनाय विवदमानाः विरुद्धं वदमाना ब्रह्म जग्मुः" भा० ।

**अहः(हस्क)कर** पु० अहः करोति कृ–ट वा सत्वम् । सूर्य्ये २अर्कवृक्षे च । [रो रः । १सूर्य्ये २अर्कवृक्षे ।

**अहः(हर्प)पति** पु० अह्नः पतिः उदयेन प्रवर्त्तकत्वात् । वा

**अहः(हश्श)शेष** पु० अह्नः शेषः वा सत्वम् । १दिवावसाने अहःशेषो यत्र ब० । २अशौचाद्यन्तिमदिने ।

**अहङ्कार** पु० अहमिति क्रियतेऽनेन कृ–घञ् । १अहमित्यभिमाने आत्मनि उत्कर्षावलम्बने २गर्व्वे ३तदाश्रये अन्तःकरणभेदे "मनोबुद्धिरहङ्कारश्चित्तं करणमान्तरम् । संशयोनिश्चयो गर्व्वः स्मरणं विषया इमे" वेदा०परि० । सांख्यमतसिद्धे ४अभिमानकारणे महत्तत्त्वजन्ये पञ्चतन्मात्रादीनां कारणे तत्त्वभेदे च यथोक्तं सां०का० । "प्रकृतेर्म्महांस्ततोऽहङ्कारस्तस्माद्गणश्च षोड़शकः । तस्मादपि षोड़शकात् पञ्चभ्यः पञ्च भूतानि" इत्युद्दिश्य तल्लक्षणकार्य्ये तत्रैवोक्ते यथा "अभिमानोऽहङ्कारस्तस्मात् द्विविधः प्रवर्त्तते सर्गः । एकादशकश्च गणस्तन्मात्रपञ्चकं चैव" । व्याख्यातं च कौ० "अभिमानोऽहङ्कारः यत् खल्वालोचितं, मतञ्च तत्राहमधिकृतः, शक्तः खल्वहमत्र, मदर्था एवामी विषयाः, मत्तोनान्योऽत्राधिकृतः कश्चिदस्त्यतोऽहमस्मीति योऽभिमानः सोऽसाधारणव्यापारत्वादहङ्कारः तमुपजीव्य हि बुद्धिरध्यवस्यति "कर्त्तव्यमेतन्मयेति" । तस्य कार्य्यभेदमाह तस्मात् द्विविधः प्रवर्त्तते सर्गः । प्रकारद्वयमाह एकादशकश्च गणः इन्द्रियाह्वयः तन्मात्रपञ्चकश्चैव द्विविधएव सर्गोऽहङ्कारात् न त्वन्यस्यैवकारेणावधारयति" । "सत्त्वरजस्तमसां साम्यावस्था प्रकृतिः प्रकृतेर्महान् महतोऽहङ्कारोऽहङ्कारात् पञ्च तन्मात्राण्युभयमिन्द्रियम्" सा०सू० । अहङ्कारसत्त्वे प्रमाणमपि दर्शितम् "बाह्याभ्यन्तराभ्यां तैश्चाहङ्कारस्य" सा०सू० "बाह्याभ्यन्तराभ्यामिन्द्रियाभ्यां तैः पञ्चतन्मात्रैश्च कार्य्यैस्तत्कारणतयाहङ्कारस्यानुमानेन बोधः इत्यर्थः । अहङ्कारश्चाभिमानवृत्तिकमन्तःकरणद्रव्यं नत्वभिमानमात्रं द्रव्यस्यैव लोके द्रव्योपादानत्वदर्शनात् । सुषुप्त्यादावहङ्कारवृत्तिनाशेन भूतनाशप्रसङ्गाच्चासनाश्रयत्वेनैवाहङ्कारास्यद्रव्यसिद्धेश्चेति । अत्रेत्थमनुमानम् । तन्मात्रेन्द्रियाणि अभिमानवद्द्रव्योपादानकानि अभिमानकार्य्यद्रव्यत्वात् । यन्नैवं तन्नैवम् । यथा पुरुषादिरिति । नन्वभिमानवद्द्रव्यमेवासिद्धमिति चेदहं गौर इत्यादिवृत्त्युपादानतया चक्षुरादिवत् तत्सिद्धेः । अनेन चानुमानेन मन आद्यतिरेकमात्रस्य तत्कारणतया प्रसाध्यत्वात् । अत्र चायमनुकूलस्तर्कः । "बहु स्यां प्रजायेय" इत्यादि श्रुतिस्मृतिभ्यस्तावद्भूतादिसृष्टेरभिमानपूर्व्वकत्वाद्बुद्धिवृत्तिपूर्व्वकसृष्टौ कारणतयाभिमानः सिद्धः । तत्र चैकार्थसमवायप्रत्यासत्त्यैवाभिमानस्य सृष्टिहेतुत्वं लाघवात् कल्प्यत इति । नन्वेवं कुलालाहङ्कारस्यापि घटोपादानत्वापत्त्या कुलालमुक्तौ तदन्तःकरणनाशे तन्निर्म्मितघटनाशः स्यात् न चैतद्युक्तम् पुरुषान्तरेण स एवायं घट इति प्रत्यभिज्ञायमानत्वादिति चेन्नैवम् मुक्तपुरुषभोगहेतुपरिणामस्यैव तदन्तःकरणमोक्षोत्तरमुच्छेदात् । न तु परिणामसामान्यस्यान्तःकरणस्वरूपस्य वोच्छेदः "कृतार्थं प्रति नष्टमप्यनष्टं तदन्यसाधारणत्वादिति" योगसूत्रे मुक्तपुरुषोपकरणस्याप्यन्यपुरुषार्थसाधकत्वसिद्धेरिति । अथ वा घटादिष्वपि हिरण्यगर्भाहङ्कार एव कारणमस्तु न कुलालाद्यहङ्कारस्तथापि सामान्यव्याप्तौ न व्यभिचारः समष्टिबुद्ध्याद्युपादानिकैव हि सृष्टिः पुराणादिषु सांख्ययोगयोश्च प्रतिपाद्यते न तु तदंशव्यष्टिबुद्ध्याद्युपादानिका यथा महापृथिव्या एव स्थावरजङ्गमाद्युपादानत्वं न तु पृथिव्यंशलोष्टादेरिति" सां०प्रव०भा० । मनुनाप्युक्तम् "मनसश्चाप्यहङ्कारमभिमन्तारमीश्वरम्" । "अहङ्कारश्च वीररसे व्यभिचारिभावः । अस्याधिष्ठाता" शङ्करः । निरहङ्काररूपत्वाद्दयावीरादिरेष नः" सा०द० "नाहङ्कारात् परो रिपुः" । "अहङ्कारविमूढात्मा कर्त्ताहमिति मन्यते" गीता ।

**अहङ्कारिन्** त्रि० अहमभिमानं करोति कृ–णिनि । १अभिमानवति २गर्व्वयुक्ते ।